International Journal of Sanskrit Research 2021; 7(4): 275-278

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(4): 275-278
© 2021 IJSR
www.anantaajournal.com
Received: 08-05-2021
Accepted: 22-06-2021

**डॉ. सुमन्तकुमारदासः**
(सहायकाचार्यः),
श्रीरमसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, रमौली-वहेडा, दरभंगा, बिहारम्, भारतम्

**Corresponding Author:**
**डॉ. सुमन्तकुमारदासः**
(सहायकाचार्यः),
श्रीरमसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, रमौली-वहेडा, दरभंगा, बिहारम्, भारतम्

# वायुपुराणे अलङ्कारविमर्शः

**डॉ. सुमन्तकुमारदासः**

**प्रस्तावना**

शब्दार्थशरीरं तावत् काव्यमिति राजशेखरादयः। तस्य चारुत्वहेतवः सन्ति गुणरीत्यलङ्कारअलंकारवृत्यादयः। तेषु काव्यचारुत्वहेतुषु अलङ्कारोऽन्यतमः। अयमलंकारः त्रिधा भवन्ति । शब्दालंकारः, अर्थालंकारः, उभयालंकारश्च । तत्र शब्दगतचारुत्वहेतवस्त्वलंकारा अनुप्रादयः। अर्थगतचारुत्वदेतवस्त्वलंकारा भवन्ति उपमादयः। अस्य प्रयोगः कविभिर्मुनिभिः वेदपुराणादिषु वैदिककालादारभ्य अद्यावध्यविलोक्यते । य़था वेदे-

स नः पितेव सूनवेऽग्ने सूपायनो भव । [1] इत्यादयः। अत्रोपमालंकारस्य कान्तिः कान्तेव शोभते । उक्तञ्च-

न कान्तमपि निर्भूषं विभाति वनिताननम् ।

वेदानां छाया भवत्येव पुराणानि । तत्र वेदानां तत्त्वं भारतस्येतिहासव्याजेनोद्धाटितमस्तीति उक्तञ्च श्रीमद्भागवते-

भारतव्यपदेशेन ह्यम्नायार्थश्च दर्शितः । [2]

एतदपि महाभारते स्पष्टमुल्लिखितमस्ति यत्-इतिहासपुराणाभ्यां वेदं समुपवृंहयेत् । अर्थात् इतिहासपुराणाभ्यां वेदानां निगूढतत्त्वं ज्ञायते ।
महर्षिवेदव्यासप्रणीताष्टादशपुराणेष्वन्यतमं पुराणं भवति वायुपुराणम् । तत्रोपमानुप्रासादीनामलंकाराणां सुचारुसन्निवेशः सहृदयानां हृदयमाल्हादयति सामाजिकचेतश्चमत्करोति । अतः एषामलंकाराणं प्रयोगः प्रायशः सर्वत्र दरीदृश्यते । तदालोच्यते शोधप्रबन्धे । पुनश्च वायुपुराणस्य सप्ताशीत्यध्याये गीतालंकाराणां वर्णनमपि परिलक्ष्यते। तत्र काव्यालंकारगीतालंकारयोः कश्चन भेदः वर्त्तते । अतः तद्विषये सविस्तरमालोचनात् प्रागेव अलंकारस्यार्थस्वरूपप्रयोजनादयः निरूपणीया इति धियात्र निरूप्यते ।

## अलंकारस्यार्थ

साहित्यशास्त्रेष्वलंकारः सौन्दर्यार्थे भूषणार्थे वा व्यवह्रियते । अलंकरोति भूषयति सुशोभयति सौन्दर्यं वर्धयति चित्तं चमत्करिति मनो हरत्याकर्षति वेत्यलंकारः।एते चारुत्वहेतवः सन्ति । अलमुपदपूर्वकं कृ करणे धातोः घ्ञि अलंकारशब्दो निष्पद्यते ।

अलंकारस्त्वाभरणं परिष्कारो विभूषणमित्यमर-सिंहः। 3.।
आचार्यभरतेनोच्यते यत् –

अलङ्कारैर्गुणैश्चैव बहुभिः समलंकृतम् ।
भूषणैरिव चित्रार्थैः तद् भूषणमितिस्मृतम्।। 4

उक्तश्च वामनेन- काव्यं ग्राह्यमलंकारत् । सौन्दर्यमलंकारः। अलंकृतिरलंकारः। काव्यशोभायाः कर्त्तारो धर्मा गुणाः। तदतिशयहेतवस्त्वलंकाराः। 5

**अलंकारस्य स्वरूपम् –**

यथा ह्यङ्गनानां शरीरे हारादयोऽलंकारास्तस्य शोभां वर्धयन्ति तथा काव्यशरीरेऽनुप्रासोपमादयोऽलंकाराः। काव्यशरीरं भवति शब्दार्थौ इति राजशेखरः काव्यमीमांसायाम् ।
आत्मनः धर्मा दयादाक्षिण्यादिगुणाः स्थिराः काव्यशोभाया कर्त्तारः। परन्तु शरीरस्य धर्मा कटककुण्डलहारादयोऽलं-कारास्त्वस्थिरास्सन्तः काव्यसौन्दर्यं वर्धयन्त्यात्मानमुप-कुर्वन्ति च ।

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिन ।
रसादीनुपकुर्वन्तोऽलंकारास्तेङ्गदादिवत् ।।
हारादिवदलंकारास्तेनुप्रासोपमादयः।।
उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।। 6

**अलंकारस्य प्रयोजनम्-**

सहृदयानां चेतश्चमत्कारजनकाल्हादोत्पादनमेवालंकारस्य प्रमुखप्रयोजनम् । काव्यं ग्राह्यमलंकारादिति वामनवचनाज्ज्ञायते । काव्यपठने श्रवणे वा या रुचिरावश्यकी सात्वलंकारादिनैव मनस्युत्पाद्यते । उक्तश्च साहित्ये-

किं वा कवितया राजन् किं वा वनितया तथा ।
पदविन्यासमात्रेण यया नापहृतं मनः।।

इतिहेतोर्मन एव मनुष्याणां कारणं बन्धमोक्षयोरितिधिया कवयः स्व स्व काव्येष्वलंकारान् सन्निवेशयन्तो दरीदृश्यन्ते वेदपुराणादिषु ।। एवं वायुपुराणे कनखलतीर्थमाहात्म्य-वर्णनप्रसंगे –

मध्ये कनखलं तीर्थं त्रिषु लोकेषु विश्रुतम् ।
स्नातः कनकवद्भाति नरो याति पवित्रताम् ।। 7

एवं सर्वत्र ।
वायुपुराणेऽस्य प्रयोजनमेवं कथ्यते गीतालंकारवर्णनप्रकरणे-

संस्थानं च प्रमाणञ्च विकारी लक्षणं तथा ।
चतुर्विधमिदं ज्ञेयमलंकारप्रयोजनम् ।।
यथात्मनो ह्यलंकारो विपर्यस्तोऽति गर्हितः ।
वर्णमेवाप्यलंकर्त्तुं विषमं ह्यात्मसंभवात् ।।
नानाभरणसंयोगाद्यथा नार्या विभूषणम् ।
वर्णश्चैवालंकारो विपर्यस्तोऽतिगर्हितः ।।
न पादे कुण्डले दृष्टे न कण्ठे रसना तथा।
एवमेव ह्यलंकारो विपर्यस्तो विगर्हितः।। 8

**वायुपुराणे अलंकारा**

वायुपुराणे विविधनदीपर्वतसरोवरणामप्सरादिनाञ्च वर्णनवेलायामलङ्कराणां कान्तिः सहृदयानां चेतश्चमत्कृत्याल्हाददायिनी भवतीति ज्ञायते । यथा

चन्द्रतुल्यप्रभैः कान्तैश्चन्द्राकारौः सुलक्षणैः।
श्वेतवैदूर्यकुमुदैश्चित्रोसौ कुमुदप्रभः।
अनेकचित्रकोद्याने नैकनिर्झरकन्दरः।
महासानुदरीसुजैर्विविधैः समलंकृतः।।

भवनविन्यासप्रसंगे मेरुगिरिवर्णनवेलायां स्वर्णभपर्वतशिखराणां तुलना सुकोमलपद्मपत्त्रैः सह विधीयते।तथैव गन्धर्ववधूनां सौन्दर्यवर्णनावसरे उपमालंकाराणां कान्तिः सहृदयहृदयमाकर्षति । यथा

**उपमा**

चन्द्रप्रतिकाशा पूर्णचन्द्रनिभानना अर्थात् अप्सराणां मुखानि पूर्णचन्द्रतुल्यानि शोभन्त इत्यत्र उपमानं भवति चन्द्रः,। उपसेयं भवति मुखम् । उपमावाचकशब्दः भवति निभः (सदृशम्) । साधारणधर्मः एव आल्हादकत्वम् । अतः अत्र पूर्णोपमालंकारः अभवत् एवं पुष्करिणीवर्णनप्रसंगे एतदवलोक्यते-

तत्र स्नातो दिवं याति स्वशरीरेण मानवः।
पाप्मानं प्रजहात्येष जीर्णत्वचमिवोरगः।। 9

अर्थात् स्वर्गे एकः सरोवरः विद्यते ।तत्र ये स्नानं विदधति ते यथा सर्पाः जीर्णत्वचं विसृज्य यान्ति तथैव मानवाः तत्र स्नानान्ते पापानि परिहाय स्वर्गं प्रविशन्ति।अत्र सर्पा उपमानम्, मानवाउपमेयम्, इव उपमावाचकशब्दः, मुक्तिः

साधारणधर्मः। अतः अत्र उपमालंकारः ।अस्यालंकारस्य लक्षणं –

**साधर्म्यमुपमा भेदे ।** [10]

अर्थात् यत्र उपमानोपमेययोर्मध्ये भेदे सति सादृश्यवर्णनं स्यात्।अयमलंकारः साधारणतः द्विविधः। पूर्णोपमालंकारः लुप्तोपमालंकारश्च । यत्र उपमानम्, उपमेयम्. उपमावाचकशब्दः, साधारणधर्मश्चेति वर्त्तन्ते तत्र पूर्णोपमालंकारः भवति. यत्रोपमानोपमेयोपमावाचकशब्द-साधारणधर्मेषु चतुर्षु एकस्याथवा द्वयोर्वा लोपः स्यात् तत्र लुप्तोपमालंकारो भवति।सप्तत्रिंशदध्याये सरोवरवर्णनावसरे बिल्ववनवर्णन-वेलायामुक्तमिदम्-

शाखासहस्रफलितैर्महस्कन्धैः समाकुलम् ।
फलैःसुवर्णसंकाशैर्हरितैः पाण्डुरैस्तथा ।।
अमृतस्वादुसंदृशैर्भेरीमात्रैः सुपगन्धिभिः।
शीर्यमाणैः पतद्भिश्च कीर्णा भूमि निरन्तरा । [11]

अत्र फलैः सुवर्णसंकाशैरित्यत्र सुवर्णमुपमानम्, फलम् उपमेयम्, संकाशैरुपमावाचकशब्दः वर्णः साधारणधर्मः। अतोऽत्रोपमालंकारः। पुनश्च अमृतस्वादुसदृशैरर्थात् बिल्ववने वृक्षाणां यानि फलानि सन्ति तेषां स्वादः सुधासदृशः आनन्दप्रदः। अर्थात् अमृतस्वादु उपमानम् फलानां स्वदुरुपमेयम्, सदृश उपमावाचकशब्दः, आल्हादकत्वं साधारणधर्मः। अतोत्र पूर्णोपमालंकारः।

**अनुप्रासालंकार :-** वसुधारे वसुमतः वसूनाममितौजसाम् ।[12] । अत्र वर्णसाम्यत्वाद् वृत्त्यनुप्रासोऽलंकारोऽभवत् । तस्य लक्षणमुक्तं काव्यप्रकाशे नवमोल्लासे

**मम्मटेन-** वर्णसाम्यमनुप्रासः छेकवृत्तिगतो द्विधा
सोनेकस्य सकृतपूर्वः एकस्याप्यसकृतपरः ।। [13]

एवमन्येऽप्यलंकारैर्वायुपुराणं समलंकृतम् वर्त्तते । अपरं च तत्र वायुपुराणे सप्ताशीत्यध्याये गीतस्य स्वरमूर्छनादि-वर्णनानन्तरमलंकारान् वर्णयति महामुनिर्व्यासदेवः एवंप्रकारेण -
वायुपुराणे अलंकारस्य स्वरूपम्-अलंकारास्तु वक्तव्याः स्वै स्वै वर्णैः प्रहेतवः

संस्थानयोगैश्च तथा पदानां चानवेक्षया ।।
वाक्यार्थपदयोगार्थैरलंकारस्य पूरणम्।। [14]

अर्थात् निजनिजवर्णैः सह पदानां यो विशेषसंयोगः स अलंकार इत्यभिधीयते । पदवाक्ययोर्योगार्थेनालंकारपूर्त्तिः स्यात् ।

चत्वारः प्रकृतौ वर्णाः प्रविचारश्चतुर्वेधः।।
विकल्पयष्टधा चैव तेवाः षोडशधा विदुः।।
स्थायी वर्णः प्रसंचारी तृतीयमवरोहणम् ।
आरोहणं चतुर्थं तु वर्णं विर्णविदो विदुः।।
तत्रैकः संचरस्थायी सचरास्तु चरीभवन् ।
अथरोहणवर्णानामवरोहं विनिर्दिशेत् ।।
आरोहणेन चाऽऽरोहवर्णं वर्णविदो विदुः।।
एतेषामेव वर्णनामलंकारान्निबोधत ।। [15]

वायुपुराणे अलंकारस्य भदाः-संगीतस्य स्वरलयानुसारेण त्रिशतमलंकाराः निरूपिताः दृश्यन्ते ।

पूर्वाचार्यमतं बुद्ध्वा प्रवक्ष्याम्यनुपूर्वशः।
त्रिशतं वै अलंकारास्तान्मे निगदतः शृणु ।। [16]

आदौ साधारणतः चत्वारः भेदाः कृताः-

अलंकारस्तु चत्वारः स्थापनी क्रमरेजिनः।
प्रमादश्चाप्रमादश्च तेषां वक्ष्यामि लक्षणम् ।। [17]

संगीते वर्णस्थानप्रयोगविशेषानुसारेण कलामात्रप्रमाणा-नुसारेण चालंकाराणां संख्या त्रिशतमिति निरूपिता।अत्र दिङ्मात्रं प्रदत्तम् ।

**स्वाभिमतम् -** अलंकारा न केवलं हारादय उपमानुप्रासादयो वा । अर्थदृष्ट्या सामाजिकदृष्ट्या सूक्ष्मातिसूक्ष्मतया वा यदि विचार्यते तर्हि एतत् वक्तुं शक्यते यत् सौन्दर्यः सर्वव्यापक आत्मवत् । यतो हि सकलसौन्दर्यमयपुरुषो भवति पुरुषोत्तमजगन्नाथः परम्ब्रह्म वा । शरीरे तं निर्गतदेहं विहाय अलंकाराणां शोभा निष्प्रभा एव।साहित्यशास्त्रे रस एव काव्यस्यात्मा । यद्यप्यलंकाराः तस्योपकारकास्सन्तः शरीरमोखन्त्युपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचिदित्युक्तिवशाद् तथापि आत्मानं विना तस्य सौन्दर्यं सौन्दर्यं न भवति इति तु निर्विवादम् । अतः यत्र यत्र धूमः तत्र तत्र अग्निरिति व्याप्तिनयेन सः सर्वव्यापकः सौन्दर्यमूर्त्तिजगन्नाथपरंब्रह्म यस्मिन् शरीरे स परंब्रह्मास्ति तत्रैवालंकाराणांमलंकारत्वं सिद्ध्यते । इति हेतोः स सर्वव्यापक इत्युच्यते मया । पुनश्च सामाजिकदृष्ट्या

उदाहरणमाध्यमेन विचार्यते-यथा मेधाविनः शिक्षकेशिष्यप्रभृतयः विद्यालयस्य अलंकाराः सन्तः समाजमुपकुर्वन्ति । यथा श्रीरामः अयोध्याया अलंकारः, उत्तमसदाचारपुरुषाः जनपदस्यालंकाराः एवं यदि विचार्यते तर्हि अलंकारः सर्वव्यापक इति वक्तुं शक्यते ।

**उपसंहार :-** वायुपुराणेऽलंकाराणां सुचारुसन्निवेशो नितरां सहृदयानां चेतांसि हरति । तत्रानुप्रासोपमाद्यलंकारा दरिदृश्यन्ते । एतदतिरिच्य सप्ताशीति-अध्याये संगीतस्य त्रिंशत्तमालंकाराः वर्ण्यन्ते । तत्र औचित्यानुसारेण सर्वे अलंकाराः विचार्यन्ते । औचित्यप्रवर्त्तकेनाचार्येण क्षेमेन्द्रेणैतत्प्रतिपादितं यद्यदि हारस्य स्थाने कण्ठे कटिस्थमेखला परिधार्यते तर्हि सौन्दर्यहानित्वाद् हास्यास्पदं स्याद् नारी तथैव औचित्यं विनालंकाराणामलंकारत्वं नश्यति । इतिकृत्वा काव्यतत्त्वानां वर्णपदस्वरवाक्यानां च यथास्थानं सन्निवेशो नितरां सौन्दर्यं वर्धयतीति शम् ।

**सन्दर्भसूची -**


1. ऋग्.२/३३/६
2. भागवतम्-१/४/२८
3. अ.को.२/0/२९
4. ना.शा-१६/५
5. (का.सू-९/२/१
6. का.प्र-8८/६६-७७
7. वा.पु-१११/७)
8. वा.पु-८७/२३-२५
9. वा.पु-११२/४६
10. का.प्र-१०/१२५
11. वा.पु-३७/११-१२
12. वै.पु-३९/४४
13. का.प्र-९/१०४-१०७
14. (वा.पु-87/2-3)
15. (वा.पु-87/5-8)
16. (वा.पु-87/1)
17. वा.पु-87/9